# श्रीकृष्णाष्टोत्तरशतनामावलिः १

॥ अथ श्रीकृष्णाष्टोत्तरशतनामावलिः ॥

ॐ श्रीकृष्णाय नमः ।
ॐ कमलानाथाय नमः ।
ॐ वासुदेवाय नमः ।
ॐ सनातनाय नमः ।
ॐ वसुदेवात्मजाय नमः ।
ॐ पुण्याय नमः ।
ॐ लीलामानुषविग्रहाय नमः ।
ॐ श्रीवत्सकौस्तुभधराय नमः ।
ॐ यशोदावत्सलाय नमः ।
ॐ हरये नमः । १०

ॐ चतुर्भुजात्तचक्रासिगदाशङ्खाद्युदायुधाय नमः ।
ॐ देवकीनन्दनाय नमः ।
ॐ श्रीशाय नमः ।
ॐ नन्दगोपप्रियात्मजाय नमः ।
ॐ यमुनावेगसंहारिणे नमः ।
ॐ बलभद्रप्रियानुजाय नमः ।
ॐ पूतनाजीवितापहराय नमः ।
ॐ शकटासुरभञ्जनाय नमः ।
ॐ नन्दव्रजजनानन्दिने नमः ।
ॐ सच्चिदानन्दविग्रहाय नमः । २०

ॐ नवनीतविलिप्ताङ्गाय नमः ।
ॐ नवनीतनटाय नमः ।
ॐ अनघाय नमः ।

ॐ नवनीतलवाहारिणे नमः ।
ॐ मुचुकुन्दप्रसादकाय नमः ।
ॐ षोडशस्त्रीसहस्रेशाय नमः ।
ॐ त्रिभङ्गिने नमः ।
ॐ मधुराकृतये नमः ।
ॐ शुकवागमृताब्धिन्दवे नमः ।
ॐ गोविन्दाय नमः । ३०

ॐ गोविदाम्पतये नमः ।
ॐ वत्सवाटीचराय नमः ।
ॐ अनन्ताय नमः ।
ॐ धेनुकासुरभञ्जनाय नमः ।
ॐ तृणीकृततृणावर्ताय नमः ।
ॐ यमलार्जुनभञ्जनाय नमः ।
ॐ उत्तालतालभेत्रे नमः ।
ॐ तमालश्यामलाकृतये नमः ।
ॐ गोपगोपीश्वराय नमः ।
ॐ योगिने नमः । ४०

ॐ कोटिसूर्यसमप्रभाय नमः ।
ॐ इलापतये नमः ।
ॐ परञ्ज्योतिषे नमः ।
ॐ यादवेन्द्राय नमः ।
ॐ यदूद्वहाय नमः ।
ॐ वनमालिने नमः ।
ॐ पीतवाससे नमः ।
ॐ पारिजातापहारकाय नमः ।
ॐ गोवर्धनाचलोद्धर्त्रे नमः ।
ॐ गोपालाय नमः । ५०

ॐ सर्वपालकाय नमः ।
ॐ अजाय नमः ।
ॐ निरञ्जनाय नमः ।
ॐ कामजनकाय नमः ।

ॐ कञ्जलोचनाय नमः ।
ॐ मधुघ्ने नमः ।
ॐ मथुरानाथाय नमः ।
ॐ द्वारकानायकाय नमः ।
ॐ बलिने नमः ।
ॐ वृन्दावनान्तसञ्चारिणे नमः । ६०

ॐ तुलसीदामभूषणाय नमः ।
ॐ स्यमन्तकमणेर्हर्त्रे नमः ।
ॐ नरनारायणात्मकाय नमः ।
ॐ कुब्जाकृष्टाम्बरधराय नमः ।
ॐ मायिने नमः ।
ॐ परमपूरुषाय नमः ।
ॐ मुष्टिकासुरचाणूरमल्लयुद्धविशारदाय नमः ।
ॐ संसारवैरिणे नमः ।
ॐ कंसारये नमः ।
ॐ मुरारये नमः । ७०

ॐ नरकान्तकाय नमः ।
ॐ अनादिब्रह्मचारिणे नमः ।
ॐ कृष्णाव्यसनकर्षकाय नमः ।
ॐ शिशुपालशिरश्छेत्रे नमः ।
ॐ दुर्योधनकुलान्तकाय नमः ।
ॐ विदुराक्रूरवरदाय नमः ।
ॐ विश्वरूपप्रदर्शकाय नमः ।
ॐ सत्यवाचे नमः ।
ॐ सत्यसङ्कल्पाय नमः ।
ॐ सत्यभामारताय नमः । ८०

ॐ जयिने नमः ।
ॐ सुभद्रापूर्वजाय नमः ।
ॐ जिष्णवे नमः ।
ॐ भीष्ममुक्तिप्रदायकाय नमः ।
ॐ जगद्गुरवे नमः ।

ॐ जगन्नाथाय नमः ।
ॐ वेणुनादविशारदाय नमः ।
ॐ वृषभासुरविध्वंसिने नमः ।
ॐ बाणासुरकरान्तकाय नमः । बाणासुरबलान्तकाय
(ॐ बकारये नमः ।
ॐ बाणनाहुकृते नमः ।)
ॐ युधिष्ठिरप्रतिष्ठात्रे नमः । ९०

ॐ बर्हिबर्हावतंसकाय नमः ।
ॐ पार्थसारथये नमः ।
ॐ अव्यक्तगीतामृतमहोदधये नमः ।
ॐ कालीयफणिमाणिक्यरञ्जितश्रीपदाम्बुजाय नमः ।
ॐ दामोदराय नमः ।
ॐ यज्ञभोक्त्रे नमः ।
ॐ दानवेन्द्रविनाशनाय नमः ।
ॐ नारायणाय नमः ।
ॐ परस्मै ब्रह्मणे नमः ।
ॐ पन्नगाशनवाहनाय नमः । १००

ॐ जलक्रीडासमासक्तगोपीवस्त्रापहारकाय नमः ।
ॐ पुण्यश्लोकाय नमः ।
ॐ तीर्थकराय नमः ।
ॐ वेदवेद्याय नमः ।
ॐ दयानिधये नमः ।
ॐ सर्वतीर्थात्मकाय नमः ।
ॐ सर्वग्रहरूपिणे नमः ।
ॐ परात्परस्मै नमः । १०८

इति श्रीकृष्णाष्टोत्तरशतनामावलिः ॥